चत्त, विकस्त इति चतेः कसेश्च विपूर्वस्य निष्ठायाम् इडभावो निपात्यते। चत्ता वर्षेण [1]विद्युत् चतिता इति भाषायाम्। विकस्त – 'उत्तानाया हृदयं यद् विकस्तम्' (मै. २. ७. ४)। विकसितम् इति भाषायाम्। निपातनं बहुत्वापेक्षम्, विकस्ताः इति बहुवचनं [2]कृतम्। अपरेषु तु निपातनेषु प्रत्येकं विभक्तिनिर्देशः।

विशस्तृ शंस्तृ शास्तृ इति शसेर्विपूर्वस्य शंसेः शासेश्च तृचि इडभावो निपात्यते। विशस्तृ–'एकस्त्वष्टुरश्वस्याविशस्ता' (ऋ. १.१६२.१९)। विशसिता इति भाषायाम्। शंस्तृ–'उत शंस्ता सुविप्रः' (ऋ. १.१६२.५)। शंसिता इति भाषायाम्। [शास्तृ – '[3]प्रशास्ता' (ऋ. १.९४.६)। प्रशासितम् इति भाषायाम्।

तरुतृ तरूतृ वरुतृ वरूतृ वरूत्रीः इति तरतेः वृङ्वृञोश्च तृचि उट् ऊट् इत्येतावागमौ निपात्येते। 'तरुतारं रथानाम्' (ऋ. १०.१७८.१), तरूतारम्। तरितारम्, तरीतारम् इति भाषायाम्। वरुतारं रथानाम्, वरूतारं रथानाम्। वरितारम्, वरीतारम् इति भाषायाम्। 'वरुत्री त्वा देवी विश्वदेव्यवती' (मै. २. ७. ६)। जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम्। अतन्त्रं चैतत्। इदमपि हि भवति - अहोरात्राणि वै वरूत्रयः इति। छान्दसिकमत्र ह्रस्वत्वम्। प्रपञ्चार्थमेव च ङीबन्तस्य निपातनम्। वरूतृशब्दो हि निपातितः, तत एव ङीपि सति सिद्धो वरूत्रीशब्दः।

उज्ज्वलिति क्षरिति क्षमिति वमिति अमिति इति च ज्वलतेरुत्पूर्वस्य क्षर क्षम वम इत्येतेषां च तिपि शपः इकारादेशो निपात्यते, शपो लुग्वा, इडागमः। अग्निरुज्ज्वलिति। उज्ज्वलति इति भाषायाम्। क्षरिति – स्तोकं क्षरिति। क्षरति इति भाषायाम्। क्षमिति – स्तोमं क्षमिति। क्षमति इति भाषायाम्। वमिति – यः सोमं वमिति। वमति इति भाषायाम्। अमिति – अभ्यमिति वरुणः। अभ्यमति इति भाषायाम्। इतिकरणं प्रदर्शनार्थम् तेन क्वचित् ईकारो भवति, 'रविमभ्यमीति वरुणः' (वा. २२.५) इत्यपि हि वेदे पठ्यते।"

## आर्धधातुकस्येड् वलादेः। (३८/२१८४)

[4]छन्दसि इति निवृत्तम्। आर्धधातुकस्य वलादेरिडागमो भवति। लविता। लवितुम्। लवितव्यम्। [5]पविता। पवितुम्। पवितव्यम्। आर्धधातुकस्य इति किम्? आस्ते। शेते। वस्ते[6]। 'रुदादिभ्यः सार्वधातुके' (७.२.७६/२४७४) इत्येतस्मिन् नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवम् भवति इति आर्धधातुकग्रहणं क्रियते। वलादेः इति किम्? लव्यम्। [7]पव्यम्। लवनीयम्। [8]पवनीयम्। इट् इति [9]वर्तमाने पुनः इड्ग्रहणं प्रतिषेधनिवृत्त्यर्थम्॥

---

1. विद्युतः क. 2. कृतं नास्ति क. 3. प्रशास्ता पोता जपपुरोहितः इ. 4. वाक्यमिदं नास्ति क. इ, न इति निवृत्तम् ड. 5. पठ पठिता पठितुम् पठितव्यम् ड. 6. इति इत्यधिकम् ब. ई. इ. 7. पठ्यम् ड, लव्यं पव्यम् नास्ति क, नास्ति ई. इ ह. 8. पठनीयम् ड. 9. अनुवर्तमाने क.